वत्करणं किम् ? स्वाश्रयमपि यथा स्यात् । आम् कुण्डेनाटन् । 'आम एकान्तरमामन्त्रितमनन्तिके' (८.१.९५/३९६२) इत्येकान्तरता भवति । स्वरे इति किम् ? कूपे सिञ्चन् । चर्म नमन् । षत्वणत्वे (८.३.१११/२१२३) (८.४.१/२३५) [1]प्रति पराङ्गवद् न भवति ।

[७३] [2]सुबन्तस्य पराङ्गवद्भावे समानाधिकरणस्योपसङ्ख्यानमनन्तरत्वात् ।

तीक्ष्णया सूच्या सीव्यन् । तीक्ष्णेन परशुना वृश्चन् (म. भा. १.३७५) ।

[७४] अव्ययानां प्रतिषेधो वक्तव्यः ।

उच्चैरधीयानः । नीचैरधीयानः (म. भा. १.३७६) ॥

## प्राक् कडारात् समासः । (३/६४८)

[3]कडारसंशब्दनात् (२.२.३८/७५१) प्राग् यानित उर्ध्वमनुक्रमिष्यामः, ते [4]समाससञ्ज्ञा वेदितव्याः । वक्ष्यति–'यथाऽसादृश्ये' (२.१.७/६६१) । यथा वृद्धं ब्राह्मणानामन्त्रयस्व । प्राग्वचनं सञ्ज्ञासमावेशार्थम् (म. भा. १.३७७) । समासप्रदेशाः–'तृतीयासमासे' (१.१.३०/२२३) इत्येवमादयः ॥

## सह सुपा । (४/६४९)

[5]सुप् इति वर्तते । सुप् इति सह इति [6]सुपा इति च[7] त्रयमपि अधिकृतं वेदितव्यम् । यदित ऊर्ध्वमनुक्रमिष्यामः, तत्रेदमुपस्थितं द्रष्टव्यम् । वक्ष्यति–'द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः' (२.१.१४/६८६) इति । द्वितीयान्तं श्रितादिभिः [8]सह समस्यते, [9]कष्टं श्रितः कष्टश्रितः । सहग्रहणं योगविभागार्थम्, [10]तिङापि सह यथा स्यात् । [11]अनुव्यचलत् । अनुप्रावर्षत् ॥

## अव्ययीभावः । (५/६५१)

अव्ययीभावः इत्यधिकारो वेदितव्यः । [12]यानित ऊर्ध्वमनुक्रमिष्यामः, [13]अव्ययीभावसञ्ज्ञास्ते वेदितव्याः । वक्ष्यति–'यथाऽसादृश्ये' (२.१.७/६६१) । यथावृद्धं ब्राह्मणानामन्त्रयस्व । [14]अन्वर्थसञ्ज्ञा चेयं महती[15] पूर्वपदार्थप्राधान्यमव्ययीभावस्य दर्शयति । अव्ययीभावप्रदेशाः–'अव्ययीभावश्च' (२.४.१८/६५९) इत्येवमादयः ॥

---

1. प्रति नास्ति फ, परांगवद्भावो न ड. इ. ह. 2. सुबन्तस्य पराङ्गवद्भावे कर्तव्ये तत्समानाधिकरणस्योपसंख्यानम् अनन्तरत्वात् न प्राप्नोति फ. 3. कडाराः कर्मधारये इति वक्ष्यति, एतस्मात् ड. 4. समाससञ्ज्ञकाः क. 5. सुप् इति वर्तते नास्ति फ. 6. सुपेति तदधिकृतं क. 7. एतद् इत्यधिकम् ब. ड. इ. फ. ह. 8. सुबन्तैः इत्यधिकम् क. ड. इ. फ. ह. 9. कष्टं श्रितः नास्ति अ. क. इ. फ, नरकश्रितः ह. 10. अत्र तिङा सह समासः इ, वाक्यमेतन्नास्ति अ. क. ड. फ. 11. अनुव्यचलत् नास्ति फ, अनुप्रावर्षत् नास्ति ड. ह. 12. यदितः क. ड. ह. इ. 13. प्राक् तत्पुरुषसञ्ज्ञायाः इत्यधिकम् ह. 14. अन्वर्था चेयं सञ्ज्ञा ह. फ. 15. तेन इत्यधिकम